National Journal of
Hindi & Sanskrit Research

**ISSN: 2454-9177**
**NJHSR 2025;** 1(62): 147-150
© 2025 NJHSR
www.sanskritarticle.com

**सागरिकासरकारः**
शोधच्छात्रा, अनुसन्धानप्रकाशनविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

**Correspondence:**
**सागरिकासरकारः**
शोधच्छात्रा, अनुसन्धानप्रकाशनविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

# कालिदासीयं व्यक्तित्वचिन्तनम्

**सागरिकासरकारः**

**उपोद्घातः**

विश्वविश्रुतमिदं यत् संस्कृतसाहित्यस्य अपारवाङ्मयस्य साहित्यसम्राट् महाकविकालिदासः। अनवद्यसाहित्यरचनया सर्वस्य साहित्यवाङ्मयस्य अनवद्यचित्रणं समेषां सहृदयानां हृदयभूमौ कृषिमकरोत् महाकविकालिदासः। साहित्यं केवलं समाजस्य दर्पणमेव न समाजपरिवर्तकं समाजचिन्तकञ्च। साहित्यस्य साक्षात् सम्बन्धः जनमानसैः सममस्ति। जनमानसस्य मनसः अनुकुलं प्रतिकुलञ्चापि साहित्यचित्रे प्रस्फुटितं भवति। अत एव साहित्यिकाः मनोवैज्ञानिका अपि इति बहूनामभिमतम्। यतो हि साहित्यं तु जनानां सुखाय विश्रान्तये च सृष्टं यत् आचार्यभरतस्य नाट्यशास्त्रे सुखार्थानां दुःखार्थानां च[1] इत्यत्र प्रतिपादितम्। मनोवैज्ञानिकं सिद्धान्तमाश्रित्य रचितं साहित्यमिति वक्तुं शक्यम्।

**मनोविज्ञानम्**

मनोविज्ञानशास्त्रं मनसोऽवस्थाः, कार्याणि च प्राधान्येन परिशीलयति। अवस्थाविशेषाः मनुष्यस्य चिन्तनादिषु स्थिता भवन्ति। मनसः परिचयः 'मनस्विनं' मानवमपि परिचायति। अयं सर्वोऽपि सामान्यमनोविज्ञानस्य विषयः। सर्वमपि वस्तु परिणमते एव। ततश्च मनः अपि क्रमशः परिणामेन विकासं प्राप्नोति। तस्मात् शिशूनां प्राणिनां च मनः कथं विकसति ? कथं च वर्धते ? कथं च परिणमते ? इति इदं सर्वं मनेविज्ञानस्य विषयो भवति। एकैकोऽपि जीवः प्रेरणानुगुणं प्रतिकुरुते। परिवेशानुगुणं क्वचित् प्रतिक्रियां कर्तुं जीवं प्रेरयति मनः। प्रेरकप्रतिक्रियाव्यापारावगमनमपि अस्यैव शास्त्रस्य विषयो भवति। यदा मानवः परिवेशानुगुणं स्वयं चेष्टाशीलो भवति तदा मानवान्तराणां क्रियाः इच्छाश्चावगत्य तदनुकूलं तत्प्रतिकूलं वा व्यापृणोति। एवं व्याप्रीयमाणानां व्यवहारः क्वचित् सामान्यो भवति। क्वचिदसामान्यः। कदाचित् वैयक्तिकभेदोऽपि वर्तते मनुष्येषु। ततश्च मानवानां मनः अवगत्य औद्योगिके, भैषज्ये, शिक्षायां, वृत्तिग्रहणे, वाणिज्ये, आनन्दस्य आस्वादने, अनुकूलदाम्पत्यसम्पादने अन्यत्र चैतादृशसामाजिकव्यवहारेषु मनोवित्रानसिद्धान्तनामुपयोगः सुतरां भवत्येव।

**मनोविज्ञानस्य क्षेत्रम्**

शास्त्रमिदं बहु व्यापकं विशालञ्च। मनुष्याणां प्राणीनां च व्यवहारस्य परिज्ञानं तु असाधारणकार्यम्। बहुषु क्षेत्रेषु विस्तृतस्यास्य मनोविज्ञानशास्त्रस्य क्षेत्राणि इमानि भवन्ति, यथा सामान्यमनोविज्ञानम्, समाजिकमनोविज्ञानम्, मानवमनोविज्ञानम्, बालमनोविज्ञानम्, परामर्शमनोविज्ञानम्, व्यक्तित्वमनोविज्ञानम् इति।

**व्यक्तिमनोविज्ञानम्**

इदमनेकेषां जनानां मध्ये वैयक्तिकमन्तरं निरूपयति, तेषां निजं वैशिष्ट्यं चान्वेषयति। जनाः भिन्नमनस्काः भवन्ति तत्र केचिज्जनाः संवेगप्रधानाः भवन्ति अन्ये विचारप्रधानाः अपरे च कर्मशीलाः। केषुचिददृष्टिप्रतिमानां प्राचुर्यं भवति, अन्येषु ध्वनिप्रतिमानम् इतरेषु च गतिप्रतिमानम्। केचिदन्तर्मुख-वृत्तयो भवन्ति केचिच्च बहिर्मुखवृतयः, अपरे चोभयमुखवृत्तयः। एवं सर्वोऽपि पुरुषोऽन्यस्माद् भिद्यते। सर्वस्या अपि जातेर्जनसमूहस्य च केचिद् विशेषाः भवन्ति। व्यक्तिमनोविज्ञानं व्यक्तीनां जातीनाम-लौकिकप्रतिभावतां मूढानां ख्यादिलिङ्गानाञ्च मनोवृत्तिः स्वभावस्य प्रारूपस्य चाध्ययनाय चेष्टते।

प्रत्येकमपि व्यक्तौ विशेषगुणाः भवन्ति तस्यैव समग्रस्यैव नामकरणं व्यक्तित्वमिति। व्यक्तित्वं जनस्य अभिवृद्धये द्वारस्वरूपम्। तद्वारेणैव जगतः पुरस्तात् परिचायितं भवति। व्यक्तित्वचर्चायां भारतीयाः अग्रेगण्याः सन्ति। आ वैदिककालात् एतत् चिन्तनं समेषां विचारधारायां वर्तते एव। कविविश्वस्य ब्रह्मा स्वयं त्रिकालदर्शी कविरेव। तस्य जगति विद्यमानाः सर्वेऽपि प्राणिनः पात्ररूपाः तस्यैव चिन्तनमन्थनसृष्टाः। तथा चोक्तं - **अपारे काव्यसंसारे कविरेकः प्रजापतिः**[2] इति। कविः अनियतसाधारणधर्मयुक्तः काव्यसंसारस्य निर्माता।

काव्यपरकं साहित्यम् उपदेशपरकम्। कान्तासम्मितोपदेशाः कवेः हृदयवचांसि इव। भगवान् धरायाः प्राणधारायाः अनियमिततां सम्पादयितुं जनेषु बहुविधानां गुणानां सन्निवेशं करोति। तस्य लक्ष्यं जनसाधारणस्य जीवनपरिवर्तनम्। सर्वेऽपि तत्तद्गुणैः अलङ्कृताः भूत्वा स्वजीवनं निवर्तयन्ति। तथैव कविः चिन्तयति कथं वा मम निर्मितपात्राणि उपदेशं दातुं समर्थानि भवन्ति। अतः बहु चिन्तयित्वा काव्यस्य नाटकस्य वा कथावस्तुनः अनुकुलं चित्रणं करोति। इदं कार्यं न सामान्यम्। अतः कविः सामान्यः विशेषः एव। सहृदयाः मन्दमतयः सन्तोऽपि आत्मनः हितपरकं विषयं सादरं गृह्णन्ति। अनेन स्पष्टं ज्ञायते कवेः चरित्रनिर्माणसिद्धान्तः अत्यन्तं मार्मिककार्यविशेषः। व्यक्तित्व-सिद्धान्तस्य ज्ञाता एव तत् कर्म सुष्ठु सम्पादयितुमर्हः।

संस्कृतकाव्यसाहित्यं लक्षण-लक्ष्यभेदेन द्विविधम्। लक्षणसाहित्यस्य रचना लक्ष्यसाहित्यस्य प्रवर्तने उपकरोति। आलङ्कारिकाः साहित्य-रचनायाः सिद्धान्तानां प्रतिपादनं नाट्यशास्त्रम्, काव्यालङ्कारः, ध्वन्यालोकः, साहित्यदर्पणः इत्यादिग्रन्थैः अकार्षुः। नायकचयन-सिद्धान्तः सर्वेषु सिद्धान्तेषु प्रमुखः अस्ति। आचार्यभरतेन नायकस्य लक्षणानि सूचितानि-

कालिदासस्य सर्वाः कृतयः भूलोकस्य सम्पूर्णजनसमाजस्य मार्गदर्शकाः भवन्ति। सः न केवलं सहृदयजनान् आनन्दसागरे स्नापयति, समीचीनजीवनशैलीमपि अभिज्ञापयति। कालिदासस्य कृतिषु चरित्रचित्रमेकं विशिष्टं स्थानं भजते। जनाः अन्येषामनुकरणं बहुधा कुर्वन्ति। नाटकादीनामध्ययनेन काव्यानां पठनेन वा भवतु नाम सर्वदा ते तेषु तेषु स्थानेषु विद्यमानचरित्राणां स्वभावमाचरणञ्च अवश्यमाश्रयन्ति। तदर्थं कृतीनां चरित्रकल्पनं सर्वेषु कार्येषु विशिष्टं भवति। त्रिकालदर्शयः कवयः भवन्ति। समस्तां बुद्धिस्थां रचनां काव्यरूपेण रूपकरूपेण वा परिणमयति।

महाकविकालिदासस्य चरित्ररचना एकं विज्ञानं भवति। कालिदासः चरित्रस्य ज्ञाता एव न निर्माता अपि। विधात्रा निर्मातरि सृष्ट्यां यत्र तस्य दृष्टिः प्रसारिता स्वयं कलावृष्टिमकरोत्। तस्य रचनायां एकस्मात् श्रेष्ठमन्यत् चरित्रं विरलमेव दृश्यते, पुनः सर्वं सर्वस्मात् पृथगेव। अत्र प्रत्येकमपि चरित्रस्य रचनया कालिदासस्य चिन्तनप्रभावः दरीदृश्यते। कालिदासीयं चरित्रचित्रणमपि कदाचित् अनेन अवगम्यते। यतो **यादृशी भावना यस्य सिद्धिर्भवति तादृशी** इति प्रसिद्धम्। कालिदासीयं व्यक्तित्वचिन्तनमत्र प्रधानं तत् साध्यते तत्कृतिषु वर्णितानां चरित्राणां माध्यमेन इति। क्रमशः इह सर्वासां कृतीनामनुसारं चरित्रनिर्माणेन तस्य व्यक्तिविषयं परिस्फोटयितुं प्रयासं विधास्यते-

कुमारसम्भवकाव्ये विशेषरूपेण चित्रितानि चरितानि सप्त इति। शङ्करः, हिमाचलः, इन्द्रः कामः इति चत्वारि पुरुषपात्राणि, पार्वती, मेना, रतिः इति त्रीणि स्त्रीपात्राणि च। एषु उक्तेषु शङ्करस्य स्थानं सर्वश्रेष्ठम्। यद्यपि नाम्नः अनुसारं काव्यस्य नायकः कुमारः इति मन्तव्यः यतो हि विवक्षितजन्म तु कुमारस्य एव किन्तु सम्पूर्णे काव्ये शिवपार्वत्योः व्यापकचरित्रचित्रणं सम्यक् दृश्यते। कुमारस्य जन्म तु बीजम्, शिवपार्वत्योः विवाहः निमित्तमात्रम्। तत् फलरूपेण वक्तव्यम्। आद्यन्ते तस्य स्थानमतः प्राधान्यं तस्य भवितुं न शक्यते। एतदर्थं कविः निजसम्पूर्णचित्रणवैभवं एतयोः दिव्यविभूतयोः वर्णने व्यायीकृतवान्।

महाकविकालिदासः पुरुषाणां चरित्रचित्रणे अधिकं बलं तेषाम् ओजःपुर्णस्य व्यक्तित्वस्य उपरि अददात्। नारीचरित्राणां तु तासां बाह्यसौन्दर्यं न चित्रयित्वा तच्चरित्राणां प्रभावः निरूपितः। चारित्रिकवैशिष्ट्यानि संवादव्यापारैः सुस्पष्टतया स्पष्टीकर्तुं कदापि न व्यस्मरत्। तेन सह शङ्करस्य स्वरूपवर्णने तस्य वेशभूषा मुद्रादीनां विस्तारेण वर्णनम् अकरोत्। तृतीयसर्गे वर्णितमहादेवस्य व्यक्तित्वं येन प्रकारेण प्रास्तुवत् तेन रघुवंशस्य दिलीपस्य विषये दत्तं विशेषणं भीमकान्तः इति सहजतया व्यञ्जितो भवति। यत्र तस्य चरित्रस्य सौन्दर्यच्छटायाः अनुभवो भवति, तत्र शङ्करभगवतः समाधिस्थस्य रूपस्य प्रभावः तावान् आसीत् येन स्वयं कामदेवः तं समाधिस्थं वीक्ष्य कम्पितो भवति।

भगवतः शङ्करस्य व्यक्तित्वे विरोधानां समन्वयो भवति। स्वयं दरिद्रः धनहीनः सन् सम्पूर्णजगतः कृते श्रेष्ठदातुः आसनमलङ्करोति। तथा च कथितम्-

**अकिञ्चनः सन् प्रभवः स सम्पदां त्रिलोकनाथः पितृसद्मगोचरः।**
**स भीमरूपः शिव इत्युदीर्यते न सन्ति याथार्थविदः पिनाकिनः॥**[3]

कवेः चरित्रस्य एकपाशेन लोकपक्षे अपरसचित्रस्य दर्शनं जातम्, यथा शरीरे लेपितः भस्मरागः श्वेतचन्द्रलेपस्य कार्यं साधितम्, तथैव मुण्डमाला कण्ठमाला सञ्जाता, गजचर्म शरीराच्छादकवस्त्रत्वेन परिणमितम्, मस्तके विद्यमानं तिलकं हरितालस्य तिलकं जातम्, चन्द्रमा कलङ्केन युक्ता सती चन्द्रशेखरस्य चूडामणिः प्रतिभासिता। एतादृशस्य शङ्करस्य व्यक्तित्वचित्रणे कविः तस्य प्रभावं तथा च, लोकोत्तरस्वरूपस्य प्रस्फुटनं कर्तुं न विस्मृतवान्। स्वयं योगिराजः किन्तु कामस्य बाणेन आत्मानम् आवद्धयति।[4] स धीरः अतः रूपलावण्यं तं न विचलियतुं शक्नोति। किन्तु तपश्चर्यया सः वशीकर्तुं योग्यः।

जगतः कर्ता अतः कस्यापि वस्तुनः अभिलाषो नास्ति। किन्तु लोककल्याणार्थं विवाहबन्धने आबद्धो भवति। प्रभुः भूत्वा अपि सामाजिकाचाराणां यथावत् पालनं करोति। स्वस्य श्वशूरं हिमालयं प्रणमति। विवाहवेलायां कुलबृद्धत्वकारणेन ब्रह्मणः चरणकमलयोः शिरः स्थापयति[5] । एवंरूपेण भगवान् शङ्करः कुमारसम्भवस्य पात्रविशेषः अचिन्त्यमहिमाशाली वर्तते।

**कुमारः-**

कुमारस्य व्यक्तित्वं बहु सुन्दरं वर्णितम्। बाल्यक्रीडायाः प्रसङ्गे तस्य शैशवोचितमुग्धता, कौतूहलं चपलता तदीयदिव्यांशस्य स्वभावविवकताम् असाधारणं सृजति। अत्यल्पवयसि शत्रुजयस्य

जिगीषुजनोचितोत्साहः, निर्भिकता, तारकेन सह संवादे वीरजनोचितदर्पः प्रगल्भता शालीनता च प्रंशसनीया।[6]

**हिमालयः-**

हिमालयं कविः देवतात्मात्वेन वर्णितवान्। हिमालयस्य दैवरूपं पार्थिवरूपञ्च वर्तते। साधारणजनाः तं पाषाणनिर्मितः वनप्रदेशस्य उच्चकोटिस्थानविशेषः इति आमनन्ति। अतः तं चेतनोचितविवाहात् सुरत तथा च सन्तानोत्पत्तिव्यापारात् असमर्थ इति मन्वते।[7] प्रायः एतदर्थं केचन हिमाचल इति नाम्ना तं पर्वतं राजा इति अभिप्रयन्ति। कालिदासः विषयेऽस्मिन् अत्यन्तं जागरूक आसीत् अत एव तस्य विशेषणं देवतात्मा इति दत्तवान्। तस्य तात्पर्यं मौलिकरूपेण शरीरं पर्वतरूपं किन्तु आन्तरिकसूक्ष्मशरीरं दिव्यमिति। आ प्राचीनकालात् आर्यसाहित्यस्य द्रढीयान् विश्वासः सम्पूर्णप्राकृतिकविभूतीनां रूपद्वयं सूक्ष्मं स्थूलञ्च। सूक्ष्मरूपं तस्य अतीन्द्रियं शक्तिस्वरूपमस्ति। तदेव देवता। सूर्य-चन्द्र-पृथिवी-अग्नि-वाय्वादिदेवतानां विषये समाना धारणा समेषां वर्तते। अयं विषयः अभिमानिव्यपदेशात् इत्यस्मिन् सूत्रे सिद्धान्तितं वर्तते।

इत्थं चेतनरूपेण दीव्यरूपेण वा तस्य वर्णनेन तस्मिन् विशिष्टव्यक्तेः अनुरूपं यथार्थगुणसन्निवेशः कृतः। पर्वतराजः इति कारणेन तस्मिन् लेशमात्रेणापि स्वाभिमानतायाः मनस्वितायाः च न्यूनता नासीत्। यदर्थं मनसि पार्वत्याः विषयकग्रहणभावानायां सत्यामपि अस्वीकृत्याः सम्भावितानादरस्य भयात् हिमाचलः पार्वतीं ग्रहीतुं भगवन्तं शङ्करं प्रार्थयितुमशक्तः।[8] हिमालयः राजजनो-चितनीतिनिपुणः आसीत्।

अनेन हिमालयस्य चेतनासत्ता सुस्पष्टतया व्यक्ता भवति। तथा च उदारत्वं लोकाचारनिपुणत्वं सन्तानवत्सलत्वं विनम्रगुणसम्पन्नः चेत्यादिगुणविशेषु प्रकटीताः भवन्ति।

नारीपात्रेषु व्यापकत्वं प्रभावगर्भितं चरित्रचित्रणं पार्वत्याः कृतं वर्तते। साधारणतया मेनायाः रत्याः च चर्चा वर्तते किन्तु न तावत् प्राचुर्येण। अरुन्धती, कृत्तिका, इन्द्राणी तथा च अन्यदेवपत्नीनां विवरणं न द्रष्टुं लभ्यते यथा पार्वत्याः वर्तते।

कालिदासेन अन्यकृतिषु अन्यनायिकानां चरित्रकरणे यथा अवर्णनीयतत्त्वस्य समावेशः कृतः तथैव कुमारसम्भवे अपि व्याधायि। हिमालयस्य पुत्रीत्वेन वर्णयित्वा तस्याः नखशिखपर्यन्तं सौन्दर्यं विरचय्य तस्य साधारणपक्षमपि दर्शितम्। वस्तुतः भगवत्याः नखशिखवर्णनमतीवविस्तरेण सूक्ष्मातिसूक्ष्मतया कृतम्। पार्वत्याः सौन्दर्यं संसारस्य समस्तसौन्दर्यराशेः उपमानभूतपदार्थं कौतूहल-वशतः यथास्थानं विनिवेश्य समस्तसंसारस्य सौन्दर्यतत्त्वमेकत्र द्रष्टुकामः इति प्रतिभासते।[9]

कालिदासस्य चरित्रचित्रणस्य इदं वैशिष्ट्यं पार्वत्याः उपरि तस्य भक्तिभावः अन्धभावः न। सः तु भगवत्याः महिम्नः समुपासकः मात्रम्। समुचिते समये पार्वत्याः नारीत्वस्य स्वाभाविकतामपि प्रास्फुटयत्। अत्र कालिदासस्य वर्णनस्य विकासक्रमस्य नैपुण्यं प्रस्फुटितम्।

मेघदूतं महाकविकालिदासस्य रचितयोः खण्डकाव्ययोः श्रेष्ठतरम्। कविः अनेन काव्येन सहृदयहृदयेषु विरहभावानायाः परकाष्ठाभावस्य परीक्षां व्यकरोत्। अत्र यक्षपात्रस्य सृजनेन सहृदयानां मनोभावस्य वियोगिभावस्य यथा मार्मिकं विश्लेषणं कृतं न तथा अन्यत्र क्वापि। मेघदूतकाव्येन कविः कर्तव्यस्य पालनं कर्तव्यमिति उपदेष्टुमिष्टम्। स्वस्मै अर्पितस्य दायित्वस्य विधिपूर्वकं श्रद्धापूर्वकञ्च पालनं करणीयम्। यदि न क्रियते तर्हि कीदृशी स्थितिर्भविष्यति तस्यैव शिक्षा कविः यक्षद्वारा ज्ञापितवान्। यक्षः प्रियावियोगस्य कारणेन विफलो भूत्वा अचेतनं मेघं प्रार्थयति मदीयां कुशलवार्तां मम प्रियायाः कृते प्रापयतु इति। अचेतनस्य कृते चेतनजनस्य दुःखस्य आविष्करणमेव तस्य दुःखस्य अतिशयत्वं दर्श्यते। कर्तव्यच्युतिः प्रवृत्तिः यक्षस्य दर्शिता-

**कश्चित् कान्ताविरहगुरुणा स्वाधिकारात्प्रमत्तः।**[10]

यक्षः स्वस्य स्वामिनः कुवेरस्य पूजायाः कृते आनेतव्यानि पुष्पाणि न आहृतानि, तेनैव कुवेरः कुपितः सन् यक्षं शप्तवान्। प्रियया सह रमनक्रियायां मग्नः जातः आसीत्। तदर्थं तस्य कृते अर्पितस्य कार्यस्य विस्मरणं जातम्। कर्तव्यस्य अपालनेन शापेन शप्तो भूत्वा रामगिर्याश्रमे शापावधिं पूरयन् वर्तते। यक्षः प्रियायाः दूरे स्थित्वा अपि सर्वदा पत्नीविषयकचिन्तने मग्नो भवति। अनेन तस्य एकपत्नीत्वव्रतस्य ज्ञानं भवति। प्रियायाः विषये सः स्वपतिधर्माचरणशीलः। यक्षः अत्यन्तं व्यवहारपटुः। मेघः काले काले कृतायाः याचनायाः क्रियाप्रतिक्रियां व्यवहारकौशलेन निभालयति। यक्षः खगोलवेत्ता अपि आसीत्। मेघमुद्दिश्य अलकापुर्याः सम्पूर्णमार्गं सुस्पष्टतया निर्दिशति। यक्षः शिवभक्तः आसीत्-

**अप्यन्यस्मिञ् जलधर महाकालमासाद्य काले**
**स्थातव्यं ते नयनविषयं यावदत्येति भानुः।**
**कुर्वन् संध्याबलिपटहतां शूलिनः श्लाघनीयाम्**
**आमन्द्राणां फलमविकलं लप्स्यसे गर्जितानाम्॥**[11]

अनेन यक्षस्य स्वामिभक्तत्वं रतिकुशलत्वं रहस्यज्ञातृत्वं प्रकृतिप्रियत्वं च गुणाः द्रष्टुं शक्यन्ते।

रूपकसाहित्यस्य सम्पूर्णस्य जगति अभिज्ञानशाकुन्तलस्य स्थानम् उच्चस्थानं भजते। महाकविकालिदासः शाकुन्तलस्य रचनायां चरित्राणां निर्माणकर्मणि येषां नियोजनम् अकरोत् ते सर्वेऽपि एकः एकस्मात् श्रेष्ठस्थाने वर्तन्ते। नाटकस्यानुकूलतया अत्यन्तजागरूकतया चरित्रेषु व्यक्तित्वस्य निवेशनं कृतं वर्तते। अत्र प्रसङ्गवशात् दुष्यन्तशकुन्तलयोः व्यक्तित्वस्य प्रकाशनं विधीयते।

नाटकस्यास्य नायकः पुरुवंशीयः राजा दुष्यन्तः। कविना राज्ञः दुष्यन्तस्य चरित्रं नाटकस्य कथावस्तुना सह तथा वर्णितं येन सः यथार्थनायकत्वेन अस्मद्गोचरो भवति। नाटकस्यारम्भे राज्ञः दुष्यन्तस्य अप्रतिमं चित्रं पाठकानां पुरस्तात् प्रस्तौति। गतिमाने रथे उपविष्टः राजा मृगमनुधावति। तच्चित्रं तं साक्षात् पिनाकिना तोलयति- मृगानुसारिणं साक्षात् पश्यामीव पिनाकिनम्[12] इति। मृगयाकार्यं महत् कष्टदायकम्। मृगयाक्रियायां प्रवृत्तः जनः बहु परिश्रम्य जन्तून् अनुधावति। तादृशकर्मणि प्रवृत्तः राजा दुष्यन्तः बहुपरिश्रान्तः सन्नपि अनाक्लान्तः इति अभासत।

दुष्यन्तः मधुरभाषी विनयी च आसीत्। एतत् सर्वं तस्य व्यक्तित्वस्य अलङ्कारसदृशाः भवन्ति। आश्रममृगोऽयं न हन्तव्यो न हन्तव्यः[13] इति ऋषिकुमारमुखात् श्रवणोत्तरं स्वस्य बाणचालनकर्मणः विरतो जातः। दुष्यन्तः सर्वगुणसम्पन्नः इति सदा प्रमाणयति कविः। आश्रमः पवित्रस्थानं भवति। तत्र प्रवेशाय केचन नियमाः भवन्ति। तान् नियमान् दुष्यन्तः बहु सम्यक् जानाति स्म। आश्रमे प्रवेशकाले विनीतवेशेन प्रवेष्टव्यानि तपोवनानि नाम[14] इति कथयन् आश्रमं प्रविशति। तथा च केवलं विनीतत्वं शरीराङ्गैः न अपि तु मृगयाकार्ये उपयुज्यमानानि साधनानि सर्वाणि आश्रमात् बहिः संस्थाप्य इत्यर्थः।

द्वितीये अङ्के नेपथ्ये ऋषिकुमारयोः वचनमाकर्ण्य तौ शीघ्रमानय इति वदति। अनेन तस्य वयोभेदेन सर्वजनादरत्वं प्रस्फुटितं भवति। पञ्चामाङ्के यदा तस्य प्रासादं प्रति ऋषिकुमारः उपस्थिताः शकुन्तलया सह, तदा तां वार्तां प्राप्य तयोः प्रवेशात् प्रागेव सिंहासनात् उत्थाय दण्डायमानः स्थितो भवति।

समग्रनाटके दुष्यन्तस्य परिमार्जितवाचनभङ्गिमायाः मार्जितरुचिबोधस्य तथा च आभिजात्यबोधस्य परिचयः सम्प्राप्यते - यथा अवर्णनीयं परकलत्रम्[15], यदि तावदस्य शिशोर्मातरं नामतः पृच्छामि[16], अथवानार्यः परदारव्यवहारः[17]इति।

राज्ञः आत्मसंयमगुणः अत्यन्तं श्लाघनीयः। शकुन्तलां प्राप्तुं यद्यपि तस्य मनसि आन्तिरिकी इच्छा आसीत् तथापि तस्याः मनोवाञ्छां न ज्ञातवान् तावत् विवाहस्य वार्तां प्रसारयितुम् अनिच्छुकः आसीत्।

दुष्यन्तस्य मातृभक्तिः पुत्रवास्तल्यं च उल्लेखनीयं वर्तते। मातुः वार्तावाहकः करभकः दुष्यन्तस्य समीपं सम्प्राप्तः। तदा किंकर्तव्यविमूढः इति स्थितिः तस्य आगता-

**कृत्ययोर्भिन्नदेशत्वाद् द्वैधीभवति मे मनः।**
**पुरः प्रतिहतं शैले स्त्रोतः स्रोतोवहो यथा॥**[18]

तस्मिन् समये सः तपस्विनां कार्यार्थं गन्तुमुद्युक्तः आसीत्। अतः मातुः आदेशं पालयितुं तस्य परमं मित्रं विदूषकं प्रेषितवान्। स्वयं च आश्रमस्थसमस्यां समाधातुं संयुक्तः अभवत्। सप्तमाङ्के पुत्रे सर्वदमने अपत्यवात्सल्यभावः दर्शितः तदपि ममौरसपुत्रो न इति जानन्नपि। तथा च-

**आलक्ष्यपदन्तमुकुलानिमित्तहास**[19]

**अनेन कस्यापि कुलाङ्कुरेण**[20]

दुष्यन्तस्य कर्तव्यपरायणस्य चित्रं दृष्टिगोचरीभवति। तपस्याकार्यं निर्विघ्नं सम्पद्यते खलु इति प्रश्ने ऋषयः उत्तरन्ति यत् कुतो धर्मक्रियाविघ्नः सतां रक्षितरि[21] इति।

**शकुन्तला**

अभिज्ञानशाकुन्तलस्य नायिका शकुन्तला। जन्मनः आरभ्य पितृमातृभ्यां परित्यक्ता सा महर्षिकण्वाश्रमे लालिता पालिता च। जन्मतः रूपलावण्यस्य अधिकारिणी शकुन्तला। यथा- न प्रभातरलं ज्योतिरुदेति वसुधातलात्[22] इति। शुद्धान्तदुर्लभमिदं वपुराश्रामवासिनो यदि जनस्य[23] इति।

आजन्म आश्रमे लालितायाः तस्याः चरित्रे स्निग्धसारल्यस्य प्रकाशो भवति। तथा च इदमपि लक्षणीयं यत् प्रकृतिं प्रति तस्य अकृत्रिमसौहार्दम्। सा नित्यं सोदरस्नेहेन वृक्षेषु जलं सिञ्चति। एतत् कार्यं तस्याः पित्रा कण्वेन न निर्दिष्टम्, कर्तव्यपालनमात्रमेव तदीयं लक्ष्यम्- न केवलं तातनियोग एव अस्ति मे सोदरस्नेहः अपि एतेषु[24] इति।

विवाहोत्तरजीवने शकुन्तला पतिगतप्राणा। पत्युः चिन्तायां मग्ना भूत्वा सामाजिककर्तव्यात् विच्यूता सा महर्षिणा अभिशप्ता। अभिशापहेतुना शकुन्तलया सह स्वकीयगान्धर्वविवाहं विस्मृतवन्तं दुष्यन्तं प्रमाणानि दर्शयितुमत्यन्तम् आकुला भवति स्म। पतिकर्तृकप्रत्याख्याता शकुन्तला पत्युः नियमक्षामुखी, एकवेणीधरा , प्रेषितभर्तृकायाः जीवनम् अचिणोते। अनेन शकुन्तलायाः व्यक्तित्वस्य उत्कृष्टगुणानां दर्शनं जातम्।

कविः सामाजिकानां कृते समाजस्थविषयान् सामाजिकचरित्राणि निर्माय आदर्शव्यक्तित्वस्य चित्रं प्रस्फोटयितुं प्रयन्तं करोति। समाजस्य हितं चिन्तयति सदा कविः। कालिदासः सदा तत्र अग्रसारी वर्तते। कालिदासस्य व्यक्तित्वस्य चिन्तनं सूक्ष्मतया भवति स्म। तत् तेषां चरित्राणां रचनाद्वारा अभिज्ञायते एव। नाटकानां काव्यानां वा चरित्राणां व्यक्तित्वस्य प्रभावः जनमानसेषु प्रबलः भवति इति निश्चप्रचम्। तत् असाध्यं कार्यं संसाधयितुं कविकालिदासः जगतः महान्तं भारम् ऊढवान् इति कथने न काचित् वचनातिशयोक्तिः।

**सन्दर्भग्रन्थसूची**


१.कालिदास दर्शन, शिवप्रसाद भारद्वाज, अशोकप्रकाशन्, देहल्ली,1975

२.कालिदास, चन्द्रवली पाण्डेय, मोतीलाल बनारसीदास, देहल्ली,2011

३.अभिज्ञानशाकुन्तलम्, सत्यनारायणचक्रवर्ती, संस्कृत पुस्तक भाण्डार, विधान सरणि कोलकाता, 2008

४.कुमारसम्भवम्, महेन्द्रप्रतापशास्त्री, राम नारायण लाल, एलाहवाद,1941

५.रघुवंशम्, लक्ष्मीपन्नाचार्यः, कृष्णदास अकादेमी, वाराणसी

६.मेघदुतम्, सत्यनारायणचक्रवर्ती, संस्कृत पुस्तक भाण्डार, विधान सरणि कोलकाता-, 2021


**सन्दर्भः**

[1]नाट्यशास्त्रम्- अध्यायः 1

[2]न्यालोकः- उद्द्योतः-3

[3]मारसम्भवम्-५.७७

[4]स्यानुमेने भगवान् विमन्युर्व्यापारमात्मन्यपि सायकानाम्।
कुमारसम्भवम्-7.83

[5]णेमतुस्तौ पितरौ प्रजानां पद्मासनास्थाय पितामहाय।
कुमारसम्भवम्- 7.96

[6]मारसम्भवम्- 17.17

[7]मारसम्भवम्-1-182

[8]याचितारं न हि देवदेवद्रिः सुतां ग्राहयितुं शशाक।
भ्यर्थनाङ्गभयेन साधुमध्यिस्थ्यमिष्टेऽप्यवलम्बतेऽर्थे॥
कुमारसम्भवम्-1.52

[9]मारसम्भवम्-1.48

[10] घदूतम्-1

[11] घदूतम्- 36

[12] भिज्ञानशाकुन्तलम्- अङ्कः-1, श्लोकः-6

[13] भिज्ञानशाकुन्तलम्- अङ्कः-1, पुटम्-40

[14] भिज्ञानशाकुन्तलम्- अङ्कः-1, पुटम्-43

[15] भिज्ञानशाकुन्तलम्- अङ्कः-5

[16] भिज्ञानशाकुन्तलम्-

[17] भिज्ञानशाकुन्तलम्-अङ्कः-7

[18] भिज्ञानशाकुन्तलम्-2.17

[19] भिज्ञानशाकुन्तलम्-7.17

[20] भिज्ञानशाकुन्तलम्-7.19

[21] भिज्ञानशाकुन्तलम्- 5

[22] भिज्ञानशाकुन्तलम्- अङ्कः-1,श्लोकः-23

[23] भिज्ञानशाकुन्तलम्- अङ्कः-1, श्लोकः-16

[24] भिज्ञानशाकुन्तलम्- 1.पुटम्-58